# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2019**
**THIRD YEAR (BATCH 2017-20)**
**SANSKRIT (Honours)**
**Paper : V**

Date : 14/12/2019
Time : 11 am – 3 pm
Full Marks : 100

## Group - A

१. यथेच्छं मन्त्र**द्वयस्य** वङ्गानुवादः कार्यः। [2 × 5]

(क) अग्निर्होता कविक्रतुः
सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्।।

(ख) स नः पितेव सूनवे
ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये।।

(ग) समानी व आकूतिः
समाना हृदयानि वः।
समानमस्तु वो मनो
यथा वः सुसहासति।।

(घ) अहं रुद्राय धनुरा तनोमि
ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणो–
म्यहं द्यावापृथिवी आ विवेश।।

२. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1 × 10]

(क) हिरण्यगर्भसूक्तस्य कः ऋषिः, किं छन्दः, का वा देवता? हिरण्यगर्भसूक्ते प्रतिपादितं दार्शनिकं तत्त्वम् आलोचयत। (3+7)

(ख) अक्षसूक्तस्य विषयः समासेनोपस्थाप्यताम्। अद्यत्वे तस्य क उपयोगः?

३. ऋषिच्छन्दोदैवतनिर्देशपुरःसर**मेको** मन्त्रो व्याख्येयः। [1 × 6]

(क) अग्निना रयिमश्नवत्
पोषमेव दिवेदिवे।
यशसं वीरवत्तमम्।।

(ख) अहं सुवे पितरमस्य मूर्ध –
न्मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वो –
तामूं द्यां वर्ष्मणोप स्पृशामि।।

४. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1 × 4]

(क) व्याकरणटिप्पणीद्वयं लेख्यम्। (2 × 2)

वक्षति, ईडे, दोषावस्तः, हन्तवा उ।

(ख) याज्ञिकदिशा टीका**द्वयं** विरचनीयम्। (2 × 2)

पुरोऽनुवाक्या, प्रातरनुवाकः, गतः, सूक्तविनियोगः, आधानम्।

(ग) **एकस्य** कस्यचित् सन्दर्भस्याशयः स्फुटीक्रियताम्। (1 × 4)

(i) अग्नीषोमप्रणयने "उप त्वाग्ने" इत्यादिकोऽनुवचनीयस्तृचः।

(ii) सूक्तविनियोगो लैङ्गिकः।

५. 1 (क) इकस्य 3(क) इकस्य वा पदपाठः प्रदेयः। (5)

६. कस्यचिदे**कस्य** प्रश्नस्योत्तरं लेख्यम्। [1 × 10]

(क) वैदिकवाङ्मये लुङ्लकारस्य प्रयोगमाधारीकृत्य प्रबन्धं रचयत।

(ख) वैदिकस्वराणां स्वरूपं सप्रपञ्चं विवृणुत।

(ग) विषयद्वयम् अवलम्ब्य टीका रचनीया।

(i) तुमर्थप्रत्ययाः (ii) इतिकरणम् (iii) लेट्लकारः

७. अधोलिखितवैदिकपदानां **पञ्चानां** लौकिकपर्यायाः प्रदेया देवनागरीलिप्या एव। [5 × 1]

पूर्वेभिः, विश्वा, इमसि, दृष्टाय, दाधार, श्रुधि, मूर्धन्, उभा, वक्षति, अश्नवत्।

## Group - B

८. यथेच्छमे**कस्य** प्रश्नस्योत्तरं समाधेयम्। [1 × 12]

(क) भारतीयसमाजे साहित्ये च महाभारतस्य प्रभावः समासेन उपस्थाप्यताम्।

(ख) भासेन कति रूपकाणि विरचितानि ? तेषां नामानि लिखत। तेषु यथेच्छं द्वयोः समासेन आलोचनं कुरुत। (1+3+4+4)

९. यथेच्छं टीका**द्वयं** करणीयम्। [2 × 5]

(क) श्रीमद्भगवद्गीता।

(ख) जानकीहरणम्।

(ग) मुद्राराक्षसम्।

(घ) मृच्छकटिकम्।

१०. यथाभिमतम् **अष्टनां** प्रश्नानामुत्तरं प्रदेयम्। [8 × 1]

(क) कथासरित्सागरस्य कः रचयिता ?

(ख) चतुर्भाणीमध्ये केषां ग्रहणम् ?

(ग) का नाम बृहत्त्रयी ?

(घ) कादम्बरीकाव्यस्य समापनं केन विहितम् ?

(ङ) उत्तरारमचरिते कति अङ्काः विद्यन्ते ?

(च) कः खलु प्रतिनायकः ऊरुभङ्गनाटके ?

(छ) रत्नावली–नाटकस्य रचयिता कः ?

(ज) “गीतगोविन्दम्” इति काव्ये कस्य स्तुतिः कृता कविना ?

(झ) “अग्निपुराणम्” केन रचितम् ?

(ञ) “नीतिशतकम्” केन प्रणीतम् ?

(ट) रामायणस्य षष्ठकाण्डस्य नाम किम् ?

(ठ) वेतालपञ्चविशतिः विरचिता केन ?

११. यथेच्छमे**कस्य** प्रश्नस्योत्तरं देयम्। [1 × 10]

(क) को नाम आयुर्वेदः ? आयुर्वेदस्य माहात्म्यम् आलोच्य प्राचीनभारतवर्षे आयुर्वेदचर्चामाधारीकृत्य प्रबन्धं रचयत।

(ख) ज्योतिर्विज्ञानविषये एकः प्रबन्धः विरचनीयः।

१२. विषय**मेक**मवलम्ब्य टीका विरचनीया। [1 × 5]

(क) छन्दोमञ्जरी (ख) बृहज्ज्ञातकम्

१३. यथेच्छं प्रश्न**पञ्चकं** समाधेयम्। [5 × 1]

(क) “आर्यभट्टीयम्” केन रचितम् ?

(ख) अमरकोषस्य रचयिता कः ?

(ग) “अभिनयदर्पणः“ केन विरचितः ?

(घ) रसरत्नसमुच्चयः केन विरचितः ?

(ङ) पृथिवीघुर्णनसूत्रं केनाविष्कृतम् ?

(च) कः सङ्गीतरत्नाकरस्य कर्ता ?

(छ) शून्यतत्त्वं केन गदितम् ?

(ज) वराहमिहिरः क आसीत् ?

——————— × ———————